Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 1 | ISSN : 2581- 6306

# अभ्यासविकारेषु बाध्यबाधकभावो नास्ति

**मयंकपाण्डेय,**
शोधच्छात्र:, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:, नई दिल्ली

**सारांशिका-** अस्मिन् शोधपत्रे अभ्यासविकारेषु बाध्यबाधकभावो नास्तीति परिभाषेन्दुशेखरस्थां परिभाषामाश्रित्य कोटिक्रमेण परिभाषाप्रतिपाद्यविषयाणां विचार: कृतो वर्तते। तत्र विचारकाले तत्तट्टीकाकृतां मतमाश्रित्य युक्तायुक्तत्वविमर्शोऽपि यथास्थानं निबद्धं वर्तते। अत्र पत्रे नागेशगूढाभिप्रायं प्रदर्श्य अन्ते कैयटमतसमीक्षणं च विहितमस्ति। अन्ते च सर्वमतसाधारण्येणोपसंहारश्च कृतो वर्तते।

मुख्यशब्द:–बाध्यबाधकभाव:, कैयटमतम्, नागेश:, परिभाषेन्दुशेखर:, धातो:, लोप:, सूत्रम्।

**भूमिका** - गण (संख्याने) धातो: सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचुरादिभ्यो णिच् इति सूत्रेण णिचि आर्धधातुकोपदेशे यददन्तं तस्यातो लोप: आर्धधातुके इत्यर्थकेन “अतो लोप:“ इति सूत्रेण लकारोत्तरवर्तिन: अकारस्य च लोपे गणि इति जाते , ण्यन्तत्वात् “ सनाद्यन्ता धातव: “ इति सूत्रेण धातुसञ्ज्ञायां सत्यां "लुङ्" इति सूत्रेण लुङि च कृते अ गण् इ त् इति जाते तदनन्तरं “च्लि लुङि“ “णिश्रिद्रुस्रुभ्य: कर्तरि चङ्“ आभ्यां सूत्राभ्यां क्रमेण च्लिप्रत्यये तत्स्थाने चङादेशे च कृते अ गण् इ अ त् इति स्थितिर्भवति। अत: परं “चङि“इति सूत्रेण द्वित्वे कृते “णेरनिटि“ इति सूत्रेण णिलोपे च जाते अ गण् गण् अ त् इति स्थितिर्भवति।इदानीं हलादिश्शेषे "ई च गण:" इति सूत्रेण ईत्वे “चो:कु:“ इति सूत्रेण कुत्वे च कृते अजीगणत् इति रूपं सिद्धयति। किन्तु अत्रेदं चिन्तनीयं यत् अ गण् गण् अ त् इत्यवस्थायां यदि पूर्वं हलादिश्शेष: स्यात्तर्हि गणरूपस्य अभ्यासस्य अभावेन गणरूपाभ्यासस्य अन्त्यस्य ईत्वं स्यात् इत्यर्थकेन ई च गण: इति सूत्रेण ईत्वस्य प्राप्ति: न स्यात्।तथा सति इदम् ईत्वं निरवकाशत्वात् यत्कर्तृकावश्यप्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवति इत्यर्थकेन येन नाप्राप्तन्यायेन हलादिश्शेषं बाधेत।एवञ्च अपवादत्वात् हलादिश्शेषात् पूर्वं अभ्यासस्य अन्त्यस्य णकारस्य ईत्वे गुणे ह्रस्वे च कृते अजिगणत् इति अनिष्टं प्रसज्जेत। अतस्तद्दोषवारणाय श्रीमता भगवता भाष्यकृता मुनिना पतञ्जलिना "अभ्यासविकारेषु बाध्यबाधकभावो नास्ति " इति परिभाषा अङ्गीकृता। परिभाषा स्वीकारे च कथं दोषाभाव इति किञ्चिन्निरूपिते। अनया परिभाषया अभ्यासविकारेषु कार्येषु परस्परं बाध्यबाधकभावस्याभाव: बोध्यते।एवञ्च पूर्वं हलादिश्शेषे तत: अकारस्य ईत्वे अजीगणत् इति इष्टस्य रूपस्य सिद्धि:।न च इदानीं पूर्वं हलादिश्शेषे गणरूपस्य अभ्यासस्याभावात् ईत्वानापत्तिरिति वाच्यम्।इति चेन्न ईत्वविधायकसूत्रारम्भसामर्थ्यात् गणपदार्थस्य अभ्यासपदार्थेन सह वैयधिकरण्येन अन्वय इति स्वीक्रियते। एवञ्च गणसम्बन्धिन: अभ्यासस्य अन्त्यस्य ईत्वम् इत्यर्थस्य च जायमानत्वेन सुतराम् ईत्वं सिद्धयति।

दीर्घोकित इत्यत्र अकिद्ग्रहणम् अस्यां परिभाषायां मानम्। तद्धि यंय्यम्यते इत्यत्र दीर्घव्यावृत्त्यर्थं कृतम्। अस्या: परिभाषाया अभावे अनुनासिकान्तस्याङ्गस्य अदन्ताभ्यासस्य नुग्स्यात् यङ्यङ्लुको: परत इत्यर्थकस्य नुगतोनुनासिकान्तस्य इति शास्त्रस्य दीर्घोऽकित इत्यस्य अप्राप्तियोग्यस्थले अचरितार्थत्वेन निरवकाशत्वाद्दीर्घोकित इत्यस्य बाधात् अभ्यासस्य अजन्तत्वाभावेन दीर्घस्य अप्रसक्त्या तद्व्यावृत्त्यर्थं कृतम् अकिद्ग्रहणं व्यर्थं सत् अभ्यासविकारेषु बाध्यबाधकभावो नास्तीतीमां परिभाषां ज्ञापयति। परिभाषार्थस्तु अभ्यासविकारप्रयोजकत्वेन अभिमतबाधकशास्त्रेण अभ्यासविकारप्रयोजकत्वेनाभिमतबाध्यशास्त्रस्य

बाधो न भवतीति। ज्ञापितायाञ्चास्यां परिभाषायां नुगतोनुनासिकान्तस्य इति बाधकत्वेनाभिमताभ्यासविकारप्रयोजकीभूतेन शास्त्रेण बाध्यत्वेनाभिमताभ्यासविकारप्रयोजकीभूतस्य दीर्घोकित इति शास्त्रस्य बाधो न भवति। तथा च नुगागमात् पूर्वमेव दीर्घो यथा न स्यात् तदर्थम् अकिद्ग्रहणं स्वांशे चरितार्थं भवति।

अत्रेयमाशङ्का जायते यत् नुगागमात्प्राग् अभ्यासस्य अकित्त्वात् अकिदिति निषेधस्याप्रवृत्त्या कृतेपि अकिद्ग्रहणे यंयम्यते इत्यत्र दीर्घो दुर्वार एवेति अकिद्ग्रहणस्य स्वांशे चारितार्थ्याभावादकिद्ग्रहणस्य न परिभाषाज्ञापकत्वं सम्भवतीति चेदत्रोच्यते – अकिद्ग्रहणे कृते यदि दीर्घो न स्यात्तर्हि नुगतोनुनासिकान्तस्येत्यनेन नुगागमे कृते सति अकिदिति निषेधः स्यादित्युत्सर्गशास्त्रप्रवृत्त्यभावसम्भावनाप्रयोज्याया अकिदित्यपवादशास्त्रप्रवृत्तिसम्भावनायाः सत्त्वेन उत्सर्गशास्त्रप्रवृत्त्यभावसम्भावनाप्रयोज्या यत्र अपवादशास्त्रप्रवृत्तिसम्भावना तत्र उत्सर्गशास्त्रस्य पूर्वमप्रवृत्तिरित्यर्थिकाया उपसञ्जनिष्यमाणनिमित्तोप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधते इत्यस्याः परिभाषायाः प्रवृत्त्या नुगागमात्प्रागपि दीर्घस्य अप्रवृत्त्या यंयम्यते इत्यादिप्रयोगाः सिद्ध्यन्ति। अकिद्ग्रहणाभावे तु यदि दीर्घो न स्यात्तर्हि नुगतोनुनासिकान्तस्येत्यनेन नुगागमे कृते सति अकिदिति निषेधः स्याद् इत्युत्सर्गशास्त्रप्रवृत्त्यभावसम्भावनाप्रयोज्याया अकिदित्यपवादशास्त्रप्रवृत्तिसम्भावनाया अभावेन दीर्घो दुर्वारस्स्यादिति दीर्घव्यावृत्त्यर्थं भवति अकिद्ग्रहणं स्वांशे चरितार्थम्। इति चेदत्रेदमाशंक्यते –

एवमपि नुकि कृते अजन्तत्वाभावादेव दीर्घस्य प्रसक्तेरभावात् तद्व्यावृत्त्यर्थं कृतमकिद्ग्रहणं व्यर्थमेवेति चेदत्रोच्यते परिभाषाज्ञापनोत्तरमपि स्वांशे चारितार्थ्याभावात् यावता विना न चरितार्थं तावता तत्सर्वमनेन ज्ञाप्यते इति न्यायेन अकिद्ग्रहणेन दीर्घोकित इति सूत्रे वैयधिकरण्येनान्वयोपि ज्ञाप्यते। एवं च अकितोभ्यासावयवस्य अचो दीर्घस्स्यादिति सूत्रार्थात् नुकि कृतेपि अभ्यासावयवस्याचो दीर्घप्राप्त्या तद्व्यावृत्त्यर्थं कृतमकिद्ग्रहणं स्वांशे चरितार्थम् भवति।

ननु परिभाषाज्ञापनोत्तरमपि दीर्घव्यावृत्तये अकिद्ग्रहणसार्थक्याय च वैयधिकरण्येनान्वयज्ञापनस्य अवश्यकरणीयतया आवश्यकत्वात्तदेव ज्ञाप्यतां तेनैव च अकिद्ग्रहणसार्थक्यसम्भवात् अकिद्ग्रहणस्य परिभाषाज्ञापकत्वं न सम्भवतीति चेदत्रोच्यते – तदप्राप्तियोग्ये स्थले अचरितार्थत्वे सति कृते चरितार्थत्वमित्येवंरूपो यो तक्रन्यायः तेन नुका दीर्घस्य बाधनात् नुगुत्तरं दीर्घस्याप्राप्त्या अकिद्ग्रहणस्य वैयर्थ्येन अकिद्ग्रहणस्य परिभाषाज्ञापकत्वसम्भवात्।

ननु एवमपि नुगतोनुनासिकान्तस्य इति सूत्रे अत इत्यत्र तपरकरणेन दीर्घाकारस्य व्यावृत्त्या कृते दीर्घे नुगागमस्य प्राप्तेरभावात् तक्रन्यायविषयाभावेन न तेन न्यायेन नुका दीर्घस्य बाधः सम्भवति तथा च निरवकाशत्वादेव नुका दीर्घस्य बाधो वक्तव्यः तथा च वैयधिकरण्येन अन्वयस्य सत्त्वात् नुगुत्तरमपि दीर्घस्य प्राप्तेः तद्व्यावृत्त्यर्थं चरितार्थस्य अकिद्ग्रहणस्य न परिभाषाज्ञापकत्वं सम्भवतीति चेदत्रोच्यते – अभ्यासे सर्वत्र ह्रस्व इतिसूत्रेण ह्रस्वस्यैव सत्त्वात् नुगतोनुनासिकान्तस्येत्यत्र तपरकरणस्य व्यावर्त्यालाभेन तपरकरणसामर्थ्यात् तस्य औपदेशिकदीर्घादिव्यावर्तकत्वस्यैव वक्तव्यतया ययम्यते इत्यत्र दीर्घोकित इति सूत्रेण विहितस्य दीर्घस्य अव्यावर्तकत्वात् दीर्घोत्तरमपि नुक्प्राप्तेस्तक्रन्यायविषयतायाः वक्तुं शक्यत्वेन तेनैव न्यायेन दीर्घस्य बाधे सति पुनर्दीर्घस्याप्रसक्त्या अकिद्ग्रहणस्यवैयर्थ्येन तस्य एतत्परिभाषाज्ञापकत्वसम्भवात्। नुगतोनुनासिकान्तस्येत्यत्र तपरकरणस्य फलं तु बाभाम्यते इत्यत्र नुगभावः ।

ननु अनया रीत्या परिभाषाया ज्ञापनं न सम्भवति अनया रीत्या परिभाषाज्ञापने चक्रकापत्तिः स्यात्, तथाहि – अकिद्ग्रहणवैयर्थ्ये परिभाषासत्त्वम्, अकिद्ग्रहणवैयर्थ्यं च तक्रन्यायेन नुग्विधायकशास्त्रस्य दीर्घविधायकशास्त्रबाधकत्वमूलकम्, तक्रन्यायप्रवृत्तिश्च नुगतोनुनासिकान्तस्य इत्यत्र तपरकरणस्य औपदेशिकदीर्घव्यावर्तकत्वमूलिका, तपरकरणस्यौपदेशिकदीर्घव्यावर्तकत्वं च सर्वत्र ह्रस्व इति शास्त्रप्रवृत्तिमूलकं, ह्रस्व इति शास्त्रप्रवृत्तिश्च प्रकृतपरिभाषाधीना, प्रकृतपरिभाषा च अकिद्ग्रहणवैयर्थ्यमूलिकेति रीत्या चक्रकापत्त्या न अकिद्ग्रहणस्य परिभाषाज्ञापकत्वं सम्भवति। एवं च अस्यां परिभाषायां प्रमाणाभावात् नुगतोनुनासिकान्तस्येति शास्त्रस्य ह्रस्व इति शास्त्रबाधकत्वेन बाभाम्यते इत्यत्र ह्रस्वाप्रवृत्या तत्र नुग्वारकतया तपरकरणस्य औपदेशिकदीर्घमात्रव्यावर्तकत्वस्य वक्तुमशक्यतया सर्वविधदीर्घव्यावर्तकत्वस्यैव वक्तव्यतया बाभाम्यते इत्यत्र नुग्वारणेपि

ययम्यते इत्यवस्थायां कृते दीर्घे नुग्प्राप्तेरभावात् तक्रन्यायविषयत्वाभावेन निरवकाशत्वेनैव नुका दीर्घबाधस्य वक्तव्यतया निरवकाशत्वान्नुकि कृते दीर्घोकित इत्यत्र वैयधिकरण्येन अन्वयस्य सत्त्वात् पुनः दीर्घस्य प्रसक्तौ तद्व्यावृत्त्यर्थमकिद्ग्रहणं चरितार्थमिति न कथंचिदपि अकिद्ग्रहणस्य परिभाषाज्ञापकत्वं सम्भवतीति चेदत्रोच्यते –

वनीवच्यते, चरीकर्तीत्यादौ तक्रन्यायेनैव नीगादिना दीर्घस्य बाधात् दीर्घाप्राप्तेः यंयम्यते इत्येतन्मात्रार्थकत्वे न ह्येकमुदाहरणमिति न्यायात् अनुक इत्येव सिद्धे अकिद्ग्रहणं व्यर्थं सत् परिभाषां ज्ञापयति।

नन्वेवमपि अकिद्ग्रहणं न ह्येकमुदाहरणं योगारम्भं प्रयोजयतीति न्यायेन अकिद्ग्रहणस्य परिभाषाज्ञापकत्वं न सम्भवति, उदाहरणान्तरस्यापि सत्त्वात्, तथाहि– छो धातोः यङि कृते आत्त्वे च कृते तस्य द्वित्वे अभ्यासह्रस्वत्वे चछायते इत्यवस्थायां दीर्घोकित इत्यनेन दीर्घे प्राप्ते छे च इत्यनेन तुकि च प्राप्ते अन्तरङ्गत्वात् तुकि कृते अभ्यासस्य कित्त्वात् तस्य दीर्घवारणार्थम् अकिद्ग्रहणस्य आवश्यकत्वेन न ह्येकमुदाहरणमितिन्यायविषयताया अभावात् पूर्वोक्तरीत्या अकिद्ग्रहणस्य परिभाषाज्ञापकत्वं न सम्भवति इति चेदत्रोच्यते– दीर्घोकित इति सूत्रे अनुवर्तमानाभ्यासपदस्य आवृत्त्या अभ्यासत्वावच्छिन्नोद्देश्यताककिद्घटितभिन्नस्येत्यर्थस्वीकारेण तुगागमे कृते सत्यपि तुकः अभ्यासत्वावच्छिन्नोद्देश्यताकत्वाभावात् अकिदिति निषेधविषयताया अभावेन पूर्वोक्तरीत्या अकिद्ग्रहणस्य वैयर्थ्येन परिभाषा ज्ञाप्यते ज्ञापितायां च अस्यां परिभाषायां ययम्यते इत्यवस्थायां दीर्घोकित इत्यनेन दीर्घे प्राप्ते तद्व्यावृत्यर्थं अकिद्ग्रहणं चरितार्थं भवति।

नन्वेवमपि नुगागमात्प्राक् अभ्यासस्य अभ्यासत्वावच्छिन्नोद्देश्यताककिद्घटितभिन्नस्यैव सत्त्वात् अकिदिति निषेधस्याप्रवृत्त्या कृतेपि अकिद्ग्रहणे तस्य न स्वांशे चारितार्थ्यमिति चेदत्रोच्यते अकिदित्यस्य किदुद्देश्यघटितभिन्नस्य इत्यर्थस्वीकारेण नुगागमात् पूर्वमनन्तरं वा किदुद्देश्यघटितत्वस्यैव सत्त्वेन दीर्घापत्तिवारणसम्भवात्।

**सन्दर्भग्रन्थसूची –**


1. परिभाषेन्दुशेखरः भूतितिलकव्याख्यानम्
2. परिभाषेन्दुशेखरः विजयाटीका
3. परिभाषेन्दुशेखरः भैरवीटीका
4. परिभाषेन्दुशेखरः दुर्गाव्याख्यानम्
5. श्रीमद्भगवद्गीताशाङ्करभाष्यम्
6. अमरकोशः
7. शब्दकल्पद्रुमः
8. पाणिनीयाष्टाध्यायी
9. पातञ्जलमहाभाष्यम्
10. सिद्धान्तकौमुदी
11. लघुशब्देन्दुशेखरः
12. अष्टाध्यायी काशिकाव्याख्यानम्